# KASHMIR SERIES OF TEXTS AND STUDIES

## NO. 18

# THE PARĀ–TRIMSHIKHĀ

with Commentary

by Abhinava Gupta

ed. with notes by

M.M. Paṇḍit Mukunda Rāma Shâstrî

REPRODUCTION OF EARLIER EDITION OF THE PARA-TRIMSHIKA WITH COMMENTARY BY ABHINAVA GUPTA.

No. XVIII.

THE

# PARĀ-TRIMSHIKĀ

WITH COMMENTARY.

THE LATTER BY

**ABHINAVA GUPTA.**

EDITED WITH NOTES

BY

MAHAMAHOPADHYAYA PAṆḌIT MUKUNDA RĀMA SHÂSTRÎ,
OFFICER-IN-CHARGE RESEARCH DEPARTMENT,
JAMMU AND KASHMIR STATE,
SRINAGAR.

---

PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT
OF HIS HIGHNESS LIEUT.-GENERAL MAHĀRĀJA
**SIR PRATĀP SINGH SĀHIB BAHĀDUR,**
G. C. S. I., G. C. I. E.,
**MAHĀRĀJA** OF JAMMU AND KASHMIR STATE.

THE RESEARCH DEPARTMENT JAMMU & KASHMIR STATE

**AROMA PUBLISHING HOUSE**

**1991**

ओं तत्सत्स्वप्रकाशानन्दवपुषे शिवाय नमः ।

अथ

# श्रीपरात्रिंशिकाग्रन्थः ।

—×:❀:×—

## श्रीमदभिनवगुप्ताचार्यकृततत्त्वविवेकाख्यव्याख्योपेतः ।

विमलकलाश्रयाभिनवसृष्टिमहा जननी
भरिततनुश्च पञ्चमुखगुप्तरुचिर्जनकः ।
तदुभययामलस्फुरितभावविसर्गमयं
हृदयमनुत्तरामृतकुलं मम संस्फुरतात् ॥ १ ॥

---

१ अभिनवसृष्टौ–शुद्धाध्वरूपायां, महः–पारिपूर्ण्यलक्षणं तेजो यस्यां, सा विमलकलाश्रया–परविमर्शसारा जननी शक्तिः, तथा पञ्चमुखेति,–पञ्चशक्तिपूरिताभिलाषः, आकाङ्क्षणीयविरहात् भरिततनुः – पूर्णस्वभावो जनकः शिवः, तदुभयेति,–तत्सामरस्यात्मनः संघट्टात् स्फुरितभावः उल्लसितसत्ताको यो बहिरुल्लिलासिषास्वभावो विसर्गः, स प्रकृतिः यत्र, तादृशम् अनुत्तरामृतकुलं स्वातन्त्र्यरूपं, मम हृदयं संस्फुरतात् इति–

'सर्वत्रात्र ह्यहं-शब्दो बोधमात्रैकगोचरः ।'

इति मीमांसावाक्येन ममेति बोधस्य हृदयं सत्तादायि स्वातन्त्र्यलक्षणं जगदानन्दादिशब्दवाच्यं पारमार्थिकं वस्तु संस्फुरतात्--सम्यक् विकसतात्; स्वातन्त्र्यरहितो हि बोधोऽबोध एव, तेन यत् बोधस्य अबोधलक्षणं स्वातन्त्र्यराहित्यं तत् अपास्य बोधतया स्फुरतात् इत्यर्थः । अथ च अभिनवगुप्तस्य विमलाभिधाना जननी, नरसिंहगुप्तो जनक इति प्रसिद्धिः। अस्य पद्यस्य व्याख्याविस्तरस्तु तन्त्रालोकविवेकेऽस्ति, तत एव द्रष्टव्यम् ।

सर्वोत्तीर्णत्वेन सर्वोत्कर्षावस्थितेः भगवतो भैरव-
स्य तथा[25] स्थातुमिच्छया विजिगीषात्मना, इयद-
नन्तज्ञानस्मृतिसंशयनिश्चयादिव्यवहारकरणे-
न, सर्वत्र च भासमाने नीलादौ तन्नीलाद्यात्मभा-
सनरूपेण द्योतनेन, सर्वैरेव तदीयप्रकाशावेशैः
तत्प्रवणैः स्तूयमानतया[26], यथेच्छं च देशका-
लावच्छेदेन सर्वात्मतागमनेन[27]; अत एव मुख्य-

२५ तथा—सर्वोत्कर्षेण।

२६ यदुक्तम्

'स्तुत्याख्यं नास्ति वस्त्वन्यद्व्यापकात्परमेश्वरात्।
सर्वोत्तीर्णादिरूपेण शिवोऽहमिति हि स्तुतिः॥'

इति।

२७ न चात्र 'देशकालावच्छेदेन सर्वात्मतागमनेन' इति विरुद्धं शङ्क्यं, यतो यो हि व्यापकः सोऽवश्यं सर्वदिक्षु सर्वकालेषु वर्तते, न तु दिक्काला-द्यनवच्छेदेन सर्वात्मता। उक्तं हि श्रीसोमानन्दपादैः

'दिक्कालादिलक्षणेन व्यापकत्वं विहन्यते।
अवश्यं व्यापको यो हि सर्वदिक्षु स वर्तते॥'

इति।

'दिक्कालाद्यनवच्छिन्नानन्तचिन्मात्रमूर्तये।
स्वानुभूत्येकमानाय नमः शान्ताय तेजसे॥'

इति तत्रभवद्भर्तृहरिपादैर्यत्सर्वात्मताया लक्षणं कृतं तदेतदनेन निराकृतम्।

पं० १ क० पु० सर्वोत्तीर्णेनेति पाठः।

पं० २ क० पु० यदनन्तेति पाठः।

पं० ४ क० पु० नीलसुखादौ इति, घ० पु० तन्नीलाद्याभासनेति च पाठः।

स्फुटयिष्यते च एतत् अविदूर एव। महे-परमानन्दरूपे पूर्वोक्ते, यदिदम् उक्तनयेन अ इति रूपं तदेव गुह्यम्, एतदेव च महागुह्यं-जगज्जननधाम, तथा उभयसमापत्त्या आनन्देन अगुह्यं सर्वचमत्कारमयं, स्व! आत्मन्नेव, हे प्रभो एवंविधवैचित्र्यकारितया प्रभवनशील, आमन्त्रणमेतत्, तच्च आमन्त्र्यस्य आमन्त्रकं प्रति तादात्म्यमाभिमुख्यं प्रातिपदिकार्थात् अधिकार्थदायि। यथोक्तम्।

'संबोधनाधिकः प्रातिपदिकार्थः।'

इति। निर्णीतं च एतत् मयैव श्रीपूर्वपञ्चिकायाम्। एतत् कथय-परावाग्रूपतया अविभक्तं स्थितमपि पश्यन्तीभुवि वाक्यप्रबन्धक्रमासूत्रणेन योजय। यथोक्तं प्राक्

---

१ 'आमन्त्रणे च' इति सूत्रे प्रातिपदिकार्थातिरिक्ते आमन्त्रणे प्रथमा इति वृत्तिकारः।

---

पं० २ ग० पु० परमानन्दमय इति पाठः॥

पं० ६ ग० पु० अधिकताधायि इति पाठः॥